श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीन्यासदशकम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीन्यासदशकम् ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अहं मद्रक्षण भरो मद्रक्षण फलं तथा।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेत् बुधः॥ १ ॥

न्यस्याम्यकिंचनः श्रीमन् अनुकूलोऽन्यवर्जितः।
विश्वास प्रार्थना पूर्वम् आत्मरक्षा भरं त्वयि॥ २ ॥

स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरम्।
स्वदत्त स्वधिया स्वार्थं स्वस्मिन् न्यस्यति मां स्वयम्॥ ३ ॥

श्रीमन्नभीष्ट वरद त्वामस्मि शरणं गतः।
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयम्॥ ४ ॥

त्वच्छेषत्वे स्थिरधियं त्वत्प्राप्त्येक प्रयोजनम्।
निषिद्ध काम्य रहितं कुरु मां नित्य किङ्करम्॥ ५ ॥

देवी भूषण हेत्यादि जुष्टस्य भगवंस्तव।
नित्यं निरपराधेषु कैंकर्येषु नियुङ्क्ष्व माम्॥ ६ ॥

मां मदीयं च निखिलं चेतनाचेतनात्मकम्।
स्वकैंकर्योपकरणं वरद स्वीकुरु स्वयम्॥ ७ ॥

त्वदेक रक्ष्यस्य मम त्वमेव करुणाकर।
न प्रवर्तय पापानि प्रवृत्तानि निवर्तय॥ ८ ॥

अकृत्यानां च करणं कृत्यानां वर्जनं च मे।
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो॥ ९ ॥

श्रीमान् नियत पञ्चाङ्गं मद्रक्षण भरार्पणम्।
अचीकरत् स्वयं स्वस्मिन् अतोऽहमिह निर्भरः॥ १० ॥

॥ इति श्रीन्यासदशकम् समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥